वैजवापः । पश्चाच्च वारिणा प्रोक्ष्य शुचौन्येवसुदाहरेत् । तोयाभावे परस्मैं भूमौसंवेशनेऽपि च । कुण्डिकायाः परित्यागोदहनं वापदिश्रुतम्" देवलः । आसान्नपरिशोधने विशेषमाह हारीतः । "तस्य यन्मात्रसुपहृतं तन्मात्रं परित्यज्य शेषस्य कण्डनप्रक्षालने कुर्य्यात् । "पयसां दध्नां क्रीतानामवहननपवनैः, व्रीहियवगोधूमानां घर्षणदलनपेषाद्यैः त्रिविधान्यानां कण्डनविस्रुतनप्रक्षालनैः फलीकृतानां घर्षणप्रक्षालेन पर्य्यग्निकरणैःशाकमूलफलानां भूस्यानग्रहणप्रक्षालनैः इक्षुकाण्डानां, स्वविधिविधानात् यत्नहविषां स्रुवणमेव स्नेहानां पुनः पाकक्रतलवणानां पुनःक्रसादिभिः स्पृष्टानां भूस्यानं तृणकाष्ठाचामादित्यदर्शनाच्छौचम् । हारी० "मत्राघ्रातेषु कांस्येषु सूद्रोच्छिष्टेषु वा पुनः । दर्शनाभ्यक्षणैः शुद्धिः स्वकाकोपहतेषु च" शाता० । दुष्टाभिशस्तपतिततिर्य्यग्योवर्षोपहतानामित्यनुवृत्तौ "यानशयनासनानि परिहार्य्याणीत्येके मन्यन्ते असंस्कृतायां भूमौ न्यस्तानां तृणानां प्रक्षालनं न रज्ञोपहतानामभ्युक्षणम् एषं क्षुद्रसमिधां महतां काष्ठानामुपघाते प्रक्षाल्यावशेषनं दारुमयाणामुच्छिष्टसमन्वारब्धानामनुलेखनम् उच्छिष्टलेपोपहतानामेव तत्तृणं मूत्रपुरीषलोहितरेतः प्रभृतिभिरुत्सर्गः मृण्मयानां पात्राणामुच्छिष्टसमन्वारब्धानामवज्वालनम् उच्छिष्टलेपोपहतानां पुनर्दहनं मूत्रपुरीषलोहितरेतःप्रभृतिभिरुत्सर्गः" बौधा० । शौचं सहस्रलोम्नां तु मारुतार्केन्दुरश्मिभिः । रेतःस्पृष्टं शवस्पृष्टमाविकं नैव शुध्यति" अङ्गिराः । अथाशुद्धप्रपवादः । नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने । स्रवणे तु शुचिर्वत्सः स्वा मृगग्रहणे शुचिः" मनुः "वत्सः प्रस्रवने मेध्यः शकुनिः फलपातने । स्त्रियश्च रतिसंसर्गे स्वा मृगग्रहणे शुचिः"शाता० "स्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत् । क्रव्याद्भिश्च हतस्याग्न्यै स्विष्टकालाद्यैश्च दस्युभिः"मनुः "तथा मांसं श्वचण्डालक्रव्यादादिनिपातितम्, याज्ञ० । शुचीति शेषः । "स्वहतास्च मृगा धन्याः पातितं तु खगैः फलम् । बालैरनुपरिक्रान्तं स्त्रीभिराचारितञ्च यत् । प्रसारितञ्च यत् पण्यं ये दोषाः स्त्रीसुखेषु च । मशकैर्मक्षिकाभिश्च निलीनं नोपहन्यते । क्षितिस्थाश्चैव याआपो गवां तृप्तिकराश्च याः"। वसि० "रश्मिरग्निरजस्वाया गौरश्वो वसुधानिलः । विप्रुषोमक्षिकाः स्वर्गे वत्सः प्रस्रवने शुचिः । कारुहस्तः शुचिः पण्यं भैक्षं योषिन्मुखं तथा" याज्ञ० । "आत्मशय्यासनं वस्त्रं जाया पात्रं कमण्डलुः । शुचीन्यात्मन एतानि परेषामशुचीनि तु" बौधा० । "स्वा भार्य्या शिशुर्वत्सः स्वसुपवीतं कमण्डलुः । आत्मनः कथितं शुद्धं न तु शुद्धं परस्य तु" शङ्खः । "आत्मशय्यासनं वस्त्रं मेध्यं वाऽमलदूषितम् । ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः । आसनं शयनं यानं स्त्रीसुखं कुतपं क्षुरम् । न दूषयन्ति विद्वांसो यज्ञेषु चमसं तथा । गौरश्वोविप्रुषः स्त्राया मक्षिका शलभः शलः । अजोहस्ती रथो वस्त्रं रश्मयश्चन्द्रसूर्य्ययोः । भूमिरग्निरजो वायुरापोदधि घृतं पयः । सर्व्वाण्येतानि शुद्धानि स्वर्गे मेध्यानि नित्यशः" यमः । "शुचिरग्निः शुचिर्वायुः पवित्रा ये वहिश्चराः । आपश्च शुचयोनित्यं पन्थाः सञ्चरणाच्छुचिः । आपःशुद्धा भूमिगता शुचिर्नारी पतिव्रता । शुचिर्धर्म्मपरो राजा संतुष्टो ब्राह्मणः शुचिः" यमः । "रजोभूर्वायुरग्निश्च मार्ज्जारश्च सदा शुचिः" विष्णुः "शुद्धं नदीगतं तोयं सर्व्व एव तथाऽऽकराः । शुद्धं प्रसारितं पण्यम् शुद्धमश्वाजयोर्मुखम् । सुखवर्ज्जं च गौः शुद्धा मार्ज्जारश्चक्रमे शुचिः" शङ्खः । "अदूष्या सन्तता धारा वातोद्धूताश्च रेणवः । स्त्रियो दृष्टाश्च बालाश्च न दुष्यन्ति कदाचन । मार्ज्जारश्चैव दर्व्वी च मारुतश्च सदा शुचिः" पराः । आकराः सोमपानं च वाचा यज्ञे प्रशस्यते" उशः० शुचयः इति शेषः । "अदूष्या सन्तता धारा वातोद्धूताश्च रेणवः । आकराः शुचयः सर्व्वे वर्जयित्वा सुराकरम्"बौधा० "रेणवः शुचयः सर्व्वे वायुना सम्प्रदीरिताः । अन्यत्र रासभाजाविश्वश्वमूकृनिवासेभ्यः" शेठी० "गवाश्वरथनागानां प्रशस्तारेणवः सदा । अप्रशस्ताः समूकृन्याःश्वाविरासभवाससाम्" उशः० "अपि नोच्छिष्टदोषोऽस्ति मधुनो न च सर्पिषः । न फलानां न चेक्षूणां नाकराणां न योषिताम्" शाता० । "शुचि पूतं स्वयं शुद्धं पवित्रं चेति केवलम् । मेध्यं चतुर्विधं लोके प्रजानां मनुरब्रवीत्"। तथा "नवं चानिर्मलं वापि शुचीति द्रव्यमुच्यते । शोधितं तु यदान्येन तत्पूतमभिधीयते । स्वयमेव हि यद् द्रव्यं केवलं धन्यतां गतम् । स्थावरं जङ्गमं वापि स्वयं शुद्धमिति स्मृतम् । अन्यद्रव्यैरदूष्यं च स्वयमन्यानि शोधयेत् । हव्यकव्येषु पूज्यं यत्सत्पवित्रमिति स्मृतम् । अथ सर्व्वाणि धान्यानि हव्यान्याभरणानि च । अवर्ज्यभक्ष्यजातीनि शुचीन्येतानि केवलम् । वर्जिते निखिले द्रव्ये शुचिसंज्ञा न वर्त्तते । तस्मिन्नेवेह